# Katha Upanishad

# કઠોપનિષત્

## Document Information

Text title : Kathopanishat

File name : katha.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic Rishis

Transliterated by : NA

Proofread by : NA, John Manetta, adriano aprigliano <adrianodabril at mail.pt>, Sunder Hattangadi

Description-comments : 3/108; Krishna YajurVeda, Mukhya upanishad

Latest update : August 16, 2002, February 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2025

*sanskritdocuments.org*

# કઠોપનિષત્

ॐ

॥ અથ કઠોપનિષદ્ ॥

ॐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહવીર્યં કરવાવહૈ ।
તેજસ્વિ નાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Part I

Canto I

ॐ ઉશન્ હ વૈ વાજશ્રવસઃ સર્વવેદસં દદૌ ।
તસ્ય હ નચિકેતા નામ પુત્ર આસ ॥ ૧॥

તઁ હ કુમારઁ સન્તં દક્ષિણાસુ
નીયમાનાસુ શ્રદ્ધાવિવેશ સોઽમન્યત ॥ ૨॥

પીતોદકા જગ્ધતૃણા દુગ્ધદોહા નિરિન્દ્રિયાઃ ।
અનન્દા નામ તે લોકાસ્તાન્ સ ગચ્છતિ તા દદત્ ॥ ૩॥

સ હોવાચ પિતરં તત કસ્મૈ માં દાસ્યસીતિ ।
દ્વિતીયં તૃતીયં તઁ હોવાચ મૃત્યવે ત્વા દદામીતિ ॥ ૪॥

બહૂનામેમિ પ્રથમો બહૂનામેમિ મધ્યમઃ ।
કિઁ સ્વિદ્યમસ્ય કર્તવ્યં યન્મયાઽદ્ય કરિષ્યતિ ॥ ૫॥

અનુપશ્ય યથા પૂર્વે પ્રતિપશ્ય તથાઽપરે ।
સસ્યમિવ મર્ત્યઃ પચ્યતે સસ્યમિવાજાયતે પુનઃ ॥ ૬॥

વૈશ્વાનરઃ પ્રવિશત્યતિથિર્બ્રાહ્મણો ગૃહાન્ ।
તસ્યૈતાઁ શાન્તિં કુર્વન્તિ હર વૈવસ્વતોદકમ્ ॥ ૭॥

આશાપ્રતીક્ષે સંગતઁ સૂનૃતાં

ચેષ્ટાપૂર્તે પુત્રપશૂँશ્ચ સર્વાન્ ।
એતદ્વૃઙ્ક્તે પુરુષસ્યાલ્પમેધસો
યસ્યાનશ્નન્વસતિ બ્રાહ્મણો ગૃહે ॥ ૮॥

તિસ્રો રાત્રીર્યદવાત્સીર્ગૃહે મે-
ઽનશ્નન્ બ્રહ્મન્નતિથિર્નમસ્યઃ ।
નમસ્તેઽસ્તુ બ્રહ્મન્ સ્વસ્તિ મેઽસ્તુ
તસ્માત્પ્રતિ ત્રીન્વરાન્વૃણીષ્વ ॥ ૯॥

શાન્તસંકલ્પઃ સુમના યથા સ્યાદ્
વીતમન્યુર્ગૌતમો માઽભિ મૃત્યો ।
ત્વત્પ્રસૃષ્ટં માઽભિવદેત્પ્રતીત
એતત્ ત્રયાણાં પ્રથમં વરં વૃણે ॥ ૧૦॥

યથા પુરસ્તાદ્ ભવિતા પ્રતીત
ઔદ્દાલકિરારુણિર્મત્પ્રસૃષ્ટઃ ।
સુખઁ રાત્રીઃ શયિતા વીતમન્યુઃ
ત્વાં દદૃશિવાન્મૃત્યુમુખાત્ પ્રમુક્તમ્ ॥ ૧૧॥

સ્વર્ગે લોકે ન ભયં કિંચનાસ્તિ
ન તત્ર ત્વં ન જરયા બિભેતિ ।
ઉભે તીર્ત્વાઽશનાયાપિપાસે
શોકાતિગો મોદતે સ્વર્ગલોકે ॥ ૧૨॥

સ ત્વમગ્નિઁ સ્વર્ગ્યમધ્યેષિ મૃત્યો
પ્રબ્રૂહિ ત્વઁ શ્રદ્દધાનાય મહ્યમ્ ।
સ્વર્ગલોકા અમૃતત્વં ભજન્ત
એતદ્ દ્વિતીયેન વૃણે વરેણ ॥ ૧૩॥

પ્ર તે બ્રવીમિ તદુ મે નિબોધ
સ્વર્ગ્યમગ્નિં નચિકેતઃ પ્રજાનન્ ।
અનન્તલોકાપ્તિમથો પ્રતિષ્ઠાં
વિદ્ધિ ત્વમેતં નિહિતં ગુહાયામ્ ॥ ૧૪॥

લોકાદિમગ્નિં તમુવાચ તસ્મૈ
યા ઇષ્ટકા યાવતીર્વા યથા વા ।
સ ચાપિ તત્પ્રત્યવદદ્યથોક્તં

અથાસ્ય મૃત્યુઃ પુનરેવાહ તુષ્ટઃ ॥ ૧૫॥

તમબ્રવીત્ પ્રીયમાણો મહાત્મા
વરં તવેહાદ્ય દદામિ ભૂયઃ ।
તવૈવ નામ્ના ભવિતાઽયમગ્નિઃ
સૃઙ્કાં ચેમામનેકરૂપાં ગૃહાણ ॥ ૧૬॥

ત્રિણાચિકેતસ્ત્રિભિરેત્ય સન્ધિં
ત્રિકર્મકૃત્તરતિ જન્મમૃત્યૂ ।
બ્રહ્મજજ્ઞં દેવમીડ્યં વિદિત્વા
નિચાય્યેમાઁ શાન્તિમત્યન્તમેતિ ॥ ૧૭॥

ત્રિણાચિકેતસ્ત્રયમેતદ્વિદિત્વા
ય એવં વિદ્વાઁશ્ચિનુતે નાચિકેતમ્ ।
સ મૃત્યુપાશાન્ પુરતઃ પ્રણોદ્ય
શોકાતિગો મોદતે સ્વર્ગલોકે ॥ ૧૮॥

એષ તેઽગ્નિર્નચિકેતઃ સ્વર્ગ્યો
યમવૃણીથા દ્વિતીયેન વરેણ ।
એતમગ્નિં તવૈવ પ્રવક્ષ્યન્તિ જનાસઃ
તૃતીયં વરં નચિકેતો વૃણીષ્વ ॥ ૧૯॥

યેયં પ્રેતે વિચિકિત્સા મનુષ્યે-
ઽસ્તીત્યેકે નાયમસ્તીતિ ચૈકે ।
એતદ્વિદ્યામનુશિષ્ટસ્ત્વયાઽહં
વરાણામેષ વરસ્તૃતીયઃ ॥ ૨૦॥

દેવૈરત્રાપિ વિચિકિત્સિતં પુરા
ન હિ સુવિજ્ઞેયમણુરેષ ધર્મઃ ।
અન્યં વરં નચિકેતો વૃણીષ્વ
મા મોપરોત્સીરતિ મા સૃજૈનમ્ ॥ ૨૧॥

દેવૈરત્રાપિ વિચિકિત્સિતં કિલ
ત્વં ચ મૃત્યો યન્ન સુજ્ઞેયમાત્થ ।
વક્તા ચાસ્ય ત્વાદૃગન્યો ન લભ્યો
નાન્યો વરસ્તુલ્ય એતસ્ય કશ્ચિત્ ॥ ૨૨॥

શતાયુષઃ પુત્રપૌત્રાન્વૃણીષ્વા
   બહૂન્પશૂન્ હસ્તિહિરણ્યમશ્વાન્ ।
ભૂમેર્મહદાયતનં વૃણીષ્વ
   સ્વયં ચ જીવ શરદો યાવદિચ્છસિ ॥ ૨૩॥

એતત્તુલ્યં યદિ મન્યસે વરં
   વૃણીષ્વ વિત્તં ચિરજીવિકાં ચ ।
મહાભૂમૌ નચિકેતસ્ત્વમેધિ
   કામાનાં ત્વા કામભાજં કરોમિ ॥ ૨૪॥

યે યે કામા દુર્લભા મર્ત્યલોકે
   સર્વાન્ કામાઁશ્છન્દતઃ પ્રાર્થયસ્વ ।
ઇમા રામાઃ સરથાઃ સતૂર્યા
   ન હીદૃશા લમ્ભનીયા મનુષ્યૈઃ ।
આભિર્મત્પ્રત્તાભિઃ પરિચારયસ્વ
   નચિકેતો મરણં માઽનુપ્રાક્ષીઃ ॥ ૨૫॥

શ્વોભાવા મર્ત્યસ્ય યદન્તકૈતત્
   સર્વેંદ્રિયાણાં જરયન્તિ તેજઃ ।
અપિ સર્વં જીવિતમલ્પમેવ
   તવૈવ વાહાસ્તવ નૃત્યગીતે ॥ ૨૬॥

ન વિત્તેન તર્પણીયો મનુષ્યો
   લપ્સ્યામહે વિત્તમદ્રાક્ષ્મ ચેત્ત્વા ।
જીવિષ્યામો યાવદીશિષ્યસિ ત્વં
   વરસ્તુ મે વરણીયઃ સ એવ ॥ ૨૭॥

અજીર્યતામમૃતાનામુપેત્ય
   જીર્યન્મર્ત્યઃ ક્વધઃસ્થઃ પ્રજાનન્ ।
અભિધ્યાયન્ વર્ણરતિપ્રમોદાન્
   અતિદીર્ઘે જીવિતે કો રમેત ॥ ૨૮॥

યસ્મિન્નિદં વિચિકિત્સન્તિ મૃત્યો
   યત્સામ્પરાયે મહતિ બ્રૂહિ નસ્તત્ ।
યોઽયં વરો ગૂઢમનુપ્રવિષ્ટો
   નાન્યં તસ્માન્નચિકેતા વૃણીતે ॥ ૨૯॥

॥ ઇતિ કાઠકોપનિષદિ પ્રથમાધ્યાયે પ્રથમા વલ્લી ॥

---

Part I

Canto II

અન્યચ્છ્રેયોઽન્યદુતૈવ પ્રેય-
  સ્તે ઉભે નાનાર્થે પુરુષઁ સિનીતઃ ।
તયોઃ શ્રેય આદદાનસ્ય સાધુ
  ભવતિ હીયતેઽર્થાદ્ય ઉ પ્રેયો વૃણીતે ॥ ૧॥

શ્રેયશ્ચ પ્રેયશ્ચ મનુષ્યમેતઃ
  તૌ સમ્પરીત્ય વિવિનક્તિ ધીરઃ ।
શ્રેયો હિ ધીરોઽભિ પ્રેયસો વૃણીતે
  પ્રેયો મન્દો યોગક્ષેમાદ્વૃણીતે ॥ ૨॥

સ ત્વં પ્રિયાન્પ્રિયરૂપાંશ્ચ કામાન્
  અભિધ્યાયન્નચિકેતોઽત્યસ્રાક્ષીઃ ।
નૈતાં સૃઙ્કાં વિત્તમયીમવાપ્તો
  યસ્યાં મજ્જન્તિ બહવો મનુષ્યાઃ ॥ ૩॥

દૂરમેતે વિપરીતે વિષૂચી
  અવિદ્યા યા ચ વિદ્યેતિ જ્ઞાતા ।
વિદ્યાભીપ્સિનં નચિકેતસં મન્યે
  ન ત્વા કામા બહવોઽલોલુપન્ત ॥ ૪॥

અવિદ્યાયામન્તરે વર્તમાનાઃ
  સ્વયં ધીરાઃ પણ્ડિતંમન્યમાનાઃ ।
દન્દ્રમ્યમાણાઃ પરિયન્તિ મૂઢા
  અન્ધેનૈવ નીયમાના યથાન્ધાઃ ॥ ૫॥

ન સામ્પરાયઃ પ્રતિભાતિ બાલં
  પ્રમાદ્યન્તં વિત્તમોહેન મૂઢમ્ ।
અયં લોકો નાસ્તિ પર ઇતિ માની
  પુનઃ પુનર્વશમાપદ્યતે મે ॥ ૬॥

શ્રવણાયાપિ બહુભિર્યો ન લભ્યઃ
  શ૱ૃણ્વન્તોઽપિ બહવો યં ન વિદ્યુઃ ।

આશ્ચર્યો વક્તા કુશલોઽસ્ય લબ્ધા
   આશ્ચર્યો જ્ઞાતા કુશલાનુશિષ્ટઃ ॥ ૭॥

ન નરેણાવરેણ પ્રોક્ત એષ
   સુવિજ્ઞેયો બહુધા ચિન્ત્યમાનઃ ।
અનન્યપ્રોક્તે ગતિરત્ર નાસ્તિ
   અણીયાન્ હ્યતર્ક્યમણુપ્રમાણાત્ ॥ ૮॥

નૈષા તર્કેણ મતિરાપનેયા
   પ્રોક્તાન્યેનૈવ સુજ્ઞાનાય પ્રેષ્ઠ ।
યાં ત્વમાપઃ સત્યધૃતિર્બતાસિ
   ત્વાદૃઙ્નો ભૂયાન્નચિકેતઃ પ્રષ્ટા ॥ ૯॥

જાનામ્યહં શેવધિરિત્યનિત્યં
   ન હ્યધ્રુવૈઃ પ્રાપ્યતે હિ ધ્રુવં તત્ ।
તતો મયા નાચિકેતશ્ચિતોઽગ્નિઃ
   અનિત્યૈર્દ્રવ્યૈઃ પ્રાપ્તવાનસ્મિ નિત્યમ્ ॥ ૧૦॥

કામસ્યાપ્તિં જગતઃ પ્રતિષ્ઠાં
   ક્રતોરાનન્ત્યમભયસ્ય પારમ્ ।
સ્તોમમહદુરુગાયં પ્રતિષ્ઠાં દૃષ્ટ્વા
   ધૃત્યા ધીરો નચિકેતોઽત્યસ્રાક્ષીઃ ॥ ૧૧॥

તં દુર્દર્શં ગૂઢમનુપ્રવિષ્ટં
   ગુહાહિતં ગહ્વરેષ્ઠં પુરાણમ્ ।
અધ્યાત્મયોગાધિગમેન દેવં
   મત્વા ધીરો હર્ષશોકૌ જહાતિ ॥ ૧૨॥

એતચ્છ્રુત્વા સમ્પરિગૃહ્ય મર્ત્યઃ
   પ્રવૃહ્ય ધર્મ્યમણુમેતમાપ્ય ।
સ મોદતે મોદનીયઁ હિ લબ્ધ્વા
   વિવૃતઁ સદ્મ નચિકેતસં મન્યે ॥ ૧૩॥

અન્યત્ર ધર્માદન્યત્રાધર્મા-
   દન્યત્રાસ્માત્કૃતાકૃતાત્ ।
અન્યત્ર ભૂતાચ્ચ ભવ્યાચ્ચ
   યત્તત્પશ્યસિ તદ્વદ ॥ ૧૪॥

સર્વે વેદા યત્પદમામનન્તિ
  તપાँ૾ સિ સર્વાણિ ચ યદ્વદન્તિ ।
યદિચ્છન્તો બ્રહ્મચર્યં ચરન્તિ
  તત્તે પદँ૾ સઙ્ગ્રહેણ બ્રવીમ્યોમિત્યેતત્ ॥ ૧૫॥

એતદ્ધ્યેવાક્ષરં બ્રહ્મ એતદ્ધ્યેવાક્ષરં પરમ્ ।
એતદ્ધ્યેવાક્ષરં જ્ઞાત્વા યો યદિચ્છતિ તસ્ય તત્ ॥ ૧૬॥

એતદાલમ્બનઁ શ્રેષ્ઠમેતદાલમ્બનં પરમ્ ।
એતદાલમ્બનં જ્ઞાત્વા બ્રહ્મલોકે મહીયતે ॥ ૧૭॥

ન જાયતે મ્રિયતે વા વિપશ્ચિ-
  ન્નાયં કુતશ્ચિન્ન બભૂવ કશ્ચિત્ ।
અજો નિત્યઃ શાશ્વતોઽયં પુરાણો
  ન હન્યતે હન્યમાને શરીરે ॥ ૧૮॥

હન્તા ચેન્મન્યતે હન્તુઁ હતશ્ચેન્મન્યતે હતમ્ ।
ઉભૌ તૌ ન વિજાનીતો નાયઁ હન્તિ ન હન્યતે ॥ ૧૯॥

અણોરણીયાન્મહતો મહીયા-
  નાત્માઽસ્ય જન્તોર્નિહિતો ગુહાયામ્ ।
તમક્રતુઃ પશ્યતિ વીતશોકો
  ધાતુપ્રસાદાન્મહિમાનમાત્મનઃ ॥ ૨૦॥

આસીનો દૂરં વ્રજતિ શયાનો યાતિ સર્વતઃ ।
કસ્તં મદામદં દેવં મદન્યો જ્ઞાતુમર્હતિ ॥ ૨૧॥

અશરીરઁ શરીરેષ્વનવસ્થેષ્વવસ્થિતમ્ ।
મહાન્તં વિભુમાત્માનં મત્વા ધીરો ન શોચતિ ॥ ૨૨॥

નાયમાત્મા પ્રવચનેન લભ્યો
  ન મેધયા ન બહુના શ્રુતેન ।
યમેવૈષ વૃણુતે તેન લભ્યઃ
  તસ્યૈષ આત્મા વિવૃણુતે તનૂँ૾ સ્વામ્ ॥ ૨૩॥

નાવિરતો દુશ્ચરિતાન્નાશાન્તો નાસમાહિતઃ ।
નાશાન્તમાનસો વાઽપિ પ્રજ્ઞાનેનૈનમાપ્નુયાત્ ॥ ૨૪॥

યસ્ય બ્રહ્મ ચ ક્ષત્રં ચ ઉભે ભવત ઓદનઃ ।
મૃત્યુર્યસ્યોપસેચનં ક ઇત્થા વેદ યત્ર સઃ ॥ ૨૫॥

ઇતિ કાઠકોપનિષદિ પ્રથમાધ્યાયે દ્વિતીયા વલ્લી ॥

---

Part I

Canto III

ઋતં પિબન્તૌ સુકૃતસ્ય લોકે
ગુહાં પ્રવિષ્ટૌ પરમે પરાર્ધે ।
છાયાતપૌ બ્રહ્મવિદો વદન્તિ
પઞ્ચાગ્નયો યે ચ ત્રિણાચિકેતાઃ ॥ ૧॥

યઃ સેતુરીજાનાનામક્ષરં બ્રહ્મ યત્ પરમ્ ।
અભયં તિતીર્ષતાં પારં નાચિકેતઁ શકેમહિ ॥ ૨॥

આત્માનઁ રથિનં વિદ્ધિ શરીરઁ રથમેવ તુ ।
બુદ્ધિં તુ સારથિં વિદ્ધિ મનઃ પ્રગ્રહમેવ ચ ॥ ૩॥

ઇન્દ્રિયાણિ હયાનાહુર્વિષયાઁ સ્તેષુ ગોચરાન્ ।
આત્મેન્દ્રિયમનોયુક્તં ભોક્તેત્યાહુર્મનીષિણઃ ॥ ૪॥

યસ્ત્વવિજ્ઞાનવાન્ભવત્યયુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણ્યવશ્યાનિ દુષ્ટાશ્વા ઇવ સારથેઃ ॥ ૫॥

યસ્તુ વિજ્ઞાનવાન્ભવતિ યુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણિ વશ્યાનિ સદશ્વા ઇવ સારથેઃ ॥ ૬॥

યસ્ત્વવિજ્ઞાનવાન્ભવત્યમનસ્કઃ સદાઽશુચિઃ ।
ન સ તત્પદમાપ્નોતિ સંસારં ચાધિગચ્છતિ ॥ ૭॥

યસ્તુ વિજ્ઞાનવાન્ભવતિ સમનસ્કઃ સદા શુચિઃ ।
સ તુ તત્પદમાપ્નોતિ યસ્માદ્ભૂયો ન જાયતે ॥ ૮॥

વિજ્ઞાનસારથિર્યસ્તુ મનઃ પ્રગ્રહવાન્નરઃ ।
સોઽધ્વનઃ પારમાપ્નોતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૯॥

ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યશ્ચ પરં મનઃ ।
મનસસ્તુ પરા બુદ્ધિર્બુદ્ધેરાત્મા મહાન્પરઃ ॥ ૧૦॥

મહતઃ પરમવ્યક્તમવ્યક્તાત્પુરુષઃ પરઃ ।
પુરુષાન્ન પરં કિંચિત્સા કાષ્ઠા સા પરા ગતિઃ ॥ ૧૧॥

એષ સર્વેષુ ભૂતેષુ ગૂઢોઽઽત્મા ન પ્રકાશતે ।
દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા સૂક્ષ્મયા સૂક્ષ્મદર્શિભિઃ ॥ ૧૨॥

યચ્છેદ્વાઙ્મનસી પ્રાજ્ઞસ્તદ્યચ્છેજ્જ્ઞાન આત્મનિ ।
જ્ઞાનમાત્મનિ મહતિ નિયચ્છેત્તદ્યચ્છેચ્છાન્ત આત્મનિ ॥ ૧૩॥

ઉત્તિષ્ઠત જાગ્રત
   પ્રાપ્ય વરાન્નિબોધત ।
ક્ષુરસ્ય ધારા નિશિતા દુરત્યયા
   દુર્ગં પથસ્તત્કવયો વદન્તિ ॥ ૧૪॥

અશબ્દમસ્પર્શમરૂપમવ્યયં
   તથાઽરસં નિત્યમગન્ધવચ્ચ યત્ ।
અનાદ્યનન્તં મહતઃ પરં ધ્રુવં
   નિચાય્ય તન્મૃત્યુમુખાત્ પ્રમુચ્યતે ॥ ૧૫॥

નાચિકેતમુપાખ્યાનં મૃત્યુપ્રોક્તઁ સનાતનમ્ ।
ઉક્ત્વા શ્રુત્વા ચ મેધાવી બ્રહ્મલોકે મહીયતે ॥ ૧૬॥

ય ઇમં પરમં ગુહ્યં શ્રાવયેદ્ બ્રહ્મસંસદિ ।
પ્રયતઃ શ્રાદ્ધકાલે વા તદાનન્ત્યાય કલ્પતે ।
તદાનન્ત્યાય કલ્પત ઇતિ ॥ ૧૭॥

ઇતિ કાઠકોપનિષદિ પ્રથમાધ્યાયે તૃતીયા વલ્લી ॥

---

Part II

Canto I

પરાઞ્ચિ ખાનિ વ્યતૃણત્ સ્વયમ્ભૂ-
   સ્તસ્માત્પરાઙ્પશ્યતિ નાન્તરાત્મન્ ।
કશ્ચિદ્ધીરઃ પ્રત્યગાત્માનમૈક્ષ-
   દાવૃત્તચક્ષુરમૃતત્વમિચ્છન્ ॥ ૧॥

પરાચઃ કામાનનુયન્તિ બાલા-
   સ્તે મૃત્યોર્યન્તિ વિતતસ્ય પાશમ્ ।

અથ ધીરા અમૃતત્વં વિદિત્વા
ધ્રુવમધ્રુવેષ્વિહ ન પ્રાર્થયન્તે ॥ ૨॥

યેન રૂપં રસં ગન્ધં શબ્દાન્ સ્પર્શાँશ્ચ મૈથુનાન્ ।
એતેનૈવ વિજાનાતિ કિમત્ર પરિશિષ્યતે । એતદ્વૈ તત્ ॥ ૩॥

સ્વપ્નાન્તં જાગરિતાન્તં ચોભૌ યેનાનુપશ્યતિ ।
મહાન્તં વિભુમાત્માનં મત્વા ધીરો ન શોચતિ ॥ ૪॥

ય ઇમં મધ્વદં વેદ આત્માનં જીવમન્તિકાત્ ।
ઈશાનં ભૂતભવ્યસ્ય ન તતો વિજુગુપ્સતે । એતદ્વૈ તત્ ॥ ૫॥

યઃ પૂર્વં તપસો જાતમદ્ભ્યઃ પૂર્વમજાયત ।
ગુહાં પ્રવિશ્ય તિષ્ઠન્તં યો ભૂતેભિર્વ્યપશ્યત । એતદ્વૈ તત્ ॥ ૬॥

યા પ્રાણેન સંભવત્યદિતિર્દેવતામયી ।
ગુહાં પ્રવિશ્ય તિષ્ઠન્તીં યા ભૂતેભિર્વ્યજાયત । એતદ્વૈ તત્ ॥ ૭॥

અરણ્યોર્નિહિતો જાતવેદા ગર્ભ ઇવ સુભૃતો ગર્ભિણીભિઃ ।
દિવે દિવે ઈડ્યો જાગૃવદ્ભિર્હવિષ્મદ્ભિર્મનુષ્યેભિરગ્નિઃ । એતદ્વૈ તત્ ॥ ૮॥

યતશ્ચોદેતિ સૂર્યોઽસ્તં યત્ર ચ ગચ્છતિ ।
તં દેવાઃ સર્વેઽર્પિતાસ્તદુ નાત્યેતિ કશ્ચન । એતદ્વૈ તત્ ॥ ૯॥

યદેવેહ તદમુત્ર યદમુત્ર તદન્વિહ ।
મૃત્યોઃ સ મૃત્યુમાપ્નોતિ ય ઇહ નાનેવ પશ્યતિ ॥ ૧૦॥

મનસૈવેદમાપ્તવ્યં નેહ નાનાઽસ્તિ કિંચન ।
મૃત્યોઃ સ મૃત્યું ગચ્છતિ ય ઇહ નાનેવ પશ્યતિ ॥ ૧૧॥

અઙ્ગુષ્ઠમાત્રઃ પુરુષો મધ્ય આત્મનિ તિષ્ઠતિ ।
ઈશાનં ભૂતભવ્યસ્ય ન તતો વિજુગુપ્સતે । એતદ્વૈ તત્ ॥ ૧૨॥

અઙ્ગુષ્ઠમાત્રઃ પુરુષો જ્યોતિરિવાધૂમકઃ ।
ઈશાનો ભૂતભવ્યસ્ય સ એવાદ્ય સ ઉ શ્વઃ । એતદ્વૈ તત્ ॥ ૧૩॥

યથોદકં દુર્ગે વૃષ્ટં પર્વતેષુ વિધાવતિ ।
એવં ધર્માન્ પૃથક્ પશ્યંસ્તાનેવાનુવિધાવતિ ॥ ૧૪॥

યથોદકં શુદ્ધે શુદ્ધમાસિક્તં તાદૃગેવ ભવતિ ।
એવં મુનેર્વિજાનત આત્મા ભવતિ ગૌતમ ॥ ૧૫॥

ઇતિ કાઠકોપનિષદિ દ્વિતીયાધ્યાયે પ્રથમા વલ્લી ॥

---

Part II

Canto II

પુરમેકાદશદ્વારમજસ્યાવક્રચેતસઃ ।
અનુષ્ઠાય ન શોચતિ વિમુક્તશ્ચ વિમુચ્યતે । એતદ્વૈ તત્ ॥ ૧॥

હꣳસઃ શુચિષદ્વસુરન્તરિક્ષસદ્-
હોતા વેદિષદતિથિર્દુરોણસત્ ।
નૃષદ્વરસદૃતસદ્વ્યોમસદ્
અબ્જા ગોજા ઋતજા અદ્રિજા ઋતં બૃહત્ ॥ ૨॥

ઊર્ધ્વં પ્રાણમુન્નયત્યપાનં પ્રત્યગસ્યતિ ।
મધ્યે વામનમાસીનં વિશ્વે દેવા ઉપાસતે ॥ ૩॥

અસ્ય વિસ્રંસમાનસ્ય શરીરસ્થસ્ય દેહિનઃ ।
દેહાદ્વિમુચ્યમાનસ્ય કિમત્ર પરિશિષ્યતે । એતદ્વૈ તત્ ॥ ૪॥

ન પ્રાણેન નાપાનેન મર્ત્યો જીવતિ કશ્ચન ।
ઇતરેણ તુ જીવન્તિ યસ્મિન્નેતાવુપાશ્રિતૌ ॥ ૫॥

હન્ત ત ઇદં પ્રવક્ષ્યામિ ગુહ્યં બ્રહ્મ સનાતનમ્ ।
યથા ચ મરણં પ્રાપ્ય આત્મા ભવતિ ગૌતમ ॥ ૬॥

યોનિમન્યે પ્રપદ્યન્તે શરીરત્વાય દેહિનઃ ।
સ્થાણુમન્યેઽનુસંયન્તિ યથાકર્મ યથાશ્રુતમ્ ॥ ૭॥

ય એષ સુપ્તેષુ જાગર્તિ કામં કામં પુરુષો નિર્મિમાણઃ ।
તદેવ શુક્રં તદ્બ્રહ્મ તદેવામૃતમુચ્યતે ।
તસ્મિꣳલ્લોકાઃ શ્રિતાઃ સર્વે તદુ નાત્યેતિ કશ્ચન । એતદ્વૈ તત્ ॥ ૮॥

અગ્નિર્યથૈકો ભુવનં પ્રવિષ્ટો
રૂપં રૂપં પ્રતિરૂપો બભૂવ ।
એકસ્તથા સર્વભૂતાન્તરાત્મા
રૂપં રૂપં પ્રતિરૂપો બહિશ્ચ ॥ ૯॥

વાયુર્યથૈકો ભુવનં પ્રવિષ્ટો

રૂપં રૂપં પ્રતિરૂપો બભૂવ ।
એકસ્તથા સર્વભૂતાન્તરાત્મા
રૂપં રૂપં પ્રતિરૂપો બહિશ્ચ ॥ ૧૦॥

સૂર્યો યથા સર્વલોકસ્ય ચક્ષુઃ
ન લિપ્યતે ચાક્ષુષૈર્બાહ્યદોષૈઃ ।
એકસ્તથા સર્વભૂતાન્તરાત્મા
ન લિપ્યતે લોકદુઃખેન બાહ્યઃ ॥ ૧૧॥

એકો વશી સર્વભૂતાન્તરાત્મા
એકં રૂપં બહુધા યઃ કરોતિ ।
તમાત્મસ્થં યેઽનુપશ્યન્તિ ધીરાઃ
તેષાં સુખં શાશ્વતં નેતરેષામ્ ॥ ૧૨॥

નિત્યોઽનિત્યાનાં ચેતનશ્ચેતનાનામ્
એકો બહૂનાં યો વિદધાતિ કામાન્ ।
તમાત્મસ્થં યેઽનુપશ્યન્તિ ધીરાઃ
તેષાં શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥ ૧૩॥

તદેતદિતિ મન્યન્તેઽનિર્દેશ્યં પરમં સુખમ્ ।
કથં નુ તદ્વિજાનીયાં કિમુ ભાતિ વિભાતિ વા ॥ ૧૪॥

ન તત્ર સૂર્યો ભાતિ ન ચન્દ્રતારકં
નેમા વિદ્યુતો ભાન્તિ કુતોઽયમગ્નિઃ ।
તમેવ ભાન્તમનુભાતિ સર્વં
તસ્ય ભાસા સર્વમિદં વિભાતિ ॥ ૧૫॥

ઇતિ કાઠકોપનિષદિ દ્વિતીયાધ્યાયે દ્વિતીયા વલ્લી ॥

---

Part II

Canto III

ઊર્ધ્વમૂલોઽવાક્શાખ એષોઽશ્વત્થઃ સનાતનઃ ।
તદેવ શુક્રં તદ્બ્રહ્મ તદેવામૃતમુચ્યતે ।
તસ્મિઁલ્લોકાઃ શ્રિતાઃ સર્વે તદુ નાત્યેતિ કશ્ચન । એતદ્વૈ તત્ ॥ ૧॥

યદિદં કિં ચ જગત્ સર્વં પ્રાણ એજતિ નિઃસૃતમ્ ।

મહદ્ભયં વજ્રમુદ્યતં ય એતદ્વિદુરમૃતાસ્તે ભવન્તિ ॥ ૨॥

ભયાદસ્યાગ્નિસ્તપતિ ભયાત્તપતિ સૂર્યઃ ।
ભયાદિન્દ્રશ્ચ વાયુશ્ચ મૃત્યુર્ધાવતિ પઞ્ચમઃ ॥ ૩॥

ઇહ ચેદશકદ્બોદ્ધું પ્રાક્ષરીરસ્ય વિસ્રસઃ ।
તતઃ સર્ગેષુ લોકેષુ શરીરત્વાય કલ્પતે ॥ ૪॥

યથાઽઽદર્શે તથાઽઽત્મનિ યથા સ્વપ્ને તથા પિતૃલોકે ।
યથાઽપ્સુ પરીવ દદૃશે તથા ગન્ધર્વલોકે
  છાયાતપયોરિવ બ્રહ્મલોકે ॥ ૫॥

ઇન્દ્રિયાણાં પૃથગ્ભાવમુદયાસ્તમયૌ ચ યત્ ।
પૃથગુત્પદ્યમાનાનાં મત્વા ધીરો ન શોચતિ ॥ ૬॥

ઇન્દ્રિયેભ્યઃ પરં મનો મનસઃ સત્ત્વમુત્તમમ્ ।
સત્ત્વાદધિ મહાનાત્મા મહતોઽવ્યક્તમુત્તમમ્ ॥ ૭॥

અવ્યક્તાત્તુ પરઃ પુરુષો વ્યાપકોઽલિઙ્ગ એવ ચ ।
યં જ્ઞાત્વા મુચ્યતે જન્તુરમૃતત્વં ચ ગચ્છતિ ॥ ૮॥

ન સંદૃશે તિષ્ઠતિ રૂપમસ્ય
  ન ચક્ષુષા પશ્યતિ કશ્ચનૈનમ્ ।
હૃદા મનીષા મનસાઽભિક્લૃપ્તો
  ય એતદ્વિદુરમૃતાસ્તે ભવન્તિ ॥ ૯॥

યદા પઞ્ચાવતિષ્ઠન્તે જ્ઞાનાનિ મનસા સહ ।
બુદ્ધિશ્ચ ન વિચેષ્ટતે તામાહુઃ પરમાં ગતિમ્ ॥ ૧૦॥

તાં યોગમિતિ મન્યન્તે સ્થિરામિન્દ્રિયધારણામ્ ।
અપ્રમત્તસ્તદા ભવતિ યોગો હિ પ્રભવાપ્યયૌ ॥ ૧૧॥

નૈવ વાચા ન મનસા પ્રાપ્તું શક્યો ન ચક્ષુષા ।
અસ્તીતિ બ્રુવતોઽન્યત્ર કથં તદુપલભ્યતે ॥ ૧૨॥

અસ્તીત્યેવોપલબ્ધવ્યસ્તત્ત્વભાવેન ચોભયોઃ ।
અસ્તીત્યેવોપલબ્ધસ્ય તત્ત્વભાવઃ પ્રસીદતિ ॥ ૧૩॥

યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય હૃદિ શ્રિતાઃ ।
અથ મર્ત્યોઽમૃતો ભવત્યત્ર બ્રહ્મ સમશ્નુતે ॥ ૧૪॥

યદા સર્વે પ્રભિદ્યન્તે હૃદયસ્યેહ ગ્રન્થયઃ ।
અથ મર્ત્યોઽમૃતો ભવત્યેતાવદ્ધ્યનુશાસનમ્ ॥ ૧૫॥

શતં ચૈકા ચ હૃદયસ્ય નાડ્ય-
સ્તાસાં મૂર્ધાનમભિનિઃસૃતૈકા ।
તયોર્ધ્વમાયન્નમૃતત્વમેતિ
વિષ્વઙ્ઙન્યા ઉત્ક્રમણે ભવન્તિ ॥ ૧૬॥

અઙ્ગુષ્ઠમાત્રઃ પુરુષોઽન્તરાત્મા
સદા જનાનાં હૃદયે સંનિવિષ્ટઃ ।
તં સ્વાચ્છરીરાત્પ્રવૃહેન્મુઞ્જાદિવેષીકાં ધૈર્યેણ ।
તં વિદ્યાચ્છુક્રમમૃતં તં વિદ્યાચ્છુક્રમમૃતમિતિ ॥ ૧૭॥

મૃત્યુપ્રોક્તાં નચિકેતોઽથ લબ્ધ્વા
વિદ્યામેતાં યોગવિધિં ચ કૃત્સ્નમ્ ।
બ્રહ્મપ્રાપ્તો વિરજોઽભૂદ્વિમૃત્યુ-
રન્યોઽપ્યેવં યો વિદધ્યાત્મમેવ ॥ ૧૮॥

સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥ ૧૯॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ કાઠકોપનિષદિ દ્વિતીયાધ્યાયે તૃતીયા વલ્લી ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહવીર્યં કરવાવહૈ ।
તેજસ્વિ નાવધીતમસ્તુ । મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ તત્ સત્ ॥

*Katha Upanishad*

pdf was typeset on February 2, 2025

Please send corrections to *sanskrit@cheerful.com*